# विविधप्रश्नावलिः - 3

**1. प्रश्नानाम् एकपदेन उत्तरं लिखत—**

क. काव्येषु किं रम्यम्?

ख. दुष्यन्तशकुन्तलयोः पुत्रस्य किं नाम?

ग. कर्मणां लेखनं कस्य पार्श्वे अस्ति?

घ. विक्रमादित्यः नगरभ्रमणसमये किं दृष्टवान्?

ङ. नर्मदा कस्मात् स्थानात् प्रादुर्भवति?

च. कस्याः नाम रेवा?

छ. कः सर्वत्र पूज्यते?

ज. कस्मात् परं सुखं नास्ति?

झ. कम्बलवन्तं किं न बाधते?

ञ. करिणां कुलं को हन्ति?

ट. हट्टः कस्मिन् दिवसे भवति?

ठ. विक्रेतारः कुत्र आपणान् आयोजयन्ति?

ड. इन्दिरायाः भाषणानि कीदृशानि आसन्?

ढ. इन्दिरा कुत्र भारतीयसेनां प्रेषितवती?

**2. प्रश्नानाम् एकवाक्येन उत्तरं लिखत—**

क. अस्माकं देशस्य नाम 'भारतवर्षम्' इति कथं प्रसिद्धम्?

ख. कालिदासेन विरचितानां नाट्यग्रन्थानां नामानि लिखत।

ग. कर्मतपस्ययोः कः भेदः?

घ. विक्रमादित्यः लोके कथं प्रसिद्धः?

छ. धूमधारजलप्रपात: कुत्र अस्ति?

ज. बन्धै: के लाभा:?

झ. दुर्लभं वच: किम्?

ञ. किं न अन्विष्यति किञ्च मृग्यते?

ट. शङ्करं पतितं दृष्ट्वा पार्वती कीदृशी भवति?

ठ. काशीतलवाहिनो का?

ड. पञ्च शाकानां नामानि लिखत?

ढ. पञ्चानाम् अन्नानां नामानि लिखत?

ण. दिवङ्गतापि का अस्माकं कृते वर्तमानेवास्ति?

त. इन्दिराया: समाधिस्थलं केन नाम्ना प्रसिद्धमस्ति?

### 3. रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं कुरुत—

क. <u>कालिदासस्य</u> उपमा विश्वप्रसिद्धा।

ख. <u>तेन</u> मेघदूतं विरचितम्।

ग. <u>मेघ:</u> दूतरूपेण अलकापुरीं गच्छति।

घ. <u>तत्रैव</u> यमलोकस्य दृश्यं दर्शितवान्।

ङ. यमराज: <u>दूतान्</u> पृच्छति।

च. <u>राज्ञ:</u> धर्म: प्रजापालनम्।

छ. <u>पुराणेषु</u> नर्मदाया: वर्णनम् अस्ति।

ज. <u>विद्वान्</u> सर्वत्र पूज्यते।

झ. नास्ति <u>ज्ञानात्</u> परं सुखम्।

### 4. कोष्ठकात् उचितानि पदानि चित्वा रिक्तस्थानानि पूरयत—

क. प्रवर्तताम् .................... पार्थिव:। (स्वहिताय/प्रकृतिहिताय)

ख. सर्व: ................. नन्दतु। (अन्यत्र/सर्वत्र)

| | | |
|---|---|---|
| ग. | सर्वो ................ पश्यतु। | (भद्राणि/अभद्राणि) |
| घ. | विक्रमादित्यस्य समीपे एकः .......... तपस्यारतः आसीत्। | (महात्मा/दुरात्मा) |
| ङ. | वने सः कठिनां ............. आरब्धवान्। | (तपस्याम्/दिनचर्याम्) |
| च. | नर्मदायाः अपरं नाम ................... अस्ति। | (भागीरथी/मेकलसुता) |
| छ. | नर्मदानदी .................... जीवनदायिनी इति कथ्यते। | (उत्तरप्रदेशस्य/मध्यप्रदेशस्य) |
| ज. | .................... सर्वत्र वै धनम्। | (शीलं/स्वर्णम्) |

## 5 उचितं योजयत —

| | (अ) | | (ब) |
|---|---|---|---|
| क. | सर्वः सर्वत्र | – | अभिज्ञानशाकुन्तलम् |
| ख. | सर्वश्रेष्ठनाट्यम् | – | नन्दतु |
| ग. | विक्रमादित्यस्य ध्येयवाक्यम् | – | अरबसागरे |
| घ. | नर्मदायाः मेलनम् | – | सत्कर्म एव धर्मः |
| ङ. | जाबालिपुरम् | – | पूजास्थानम् |
| च. | गुणाः | – | जबलपुरनगरम् |

## 6. शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत—

| | | |
|---|---|---|
| क. | मेघदूते नर्मदायाः वर्णनं नास्ति। | |
| ख. | रेवा नर्मदायाः अपरं नाम अस्ति। | |
| ग. | कालिदासस्य उपमा विश्वप्रसिद्धा अस्ति। | |
| घ. | गणनाप्रसङ्गे कालिदासः अनामिकाधिष्ठितः अस्ति। | |
| ङ. | विद्वान् सर्वत्र न पूज्यते। | |
| च. | आज्ञा गुरूणाम् ह्यविचारणीया। | |

**7. अपेक्षितं पदपरिचयं लिखत—**

| | पदम् | मूलशब्दः | लिङ्गम् | विभक्तिः | वचनम् | अर्थः |
|---|---|---|---|---|---|---|
| क. | नर्मदा | | | | | |
| ख. | कालिदासः | | | | | |
| ग. | मेघदूतस्य | | | | | |
| घ. | नाटकेषु | | | | | |
| ङ. | कवीनाम् | | | | | |
| च. | राज्ञः | | | | | |
| छ. | उत्तमानि | | | | | |
| ज. | एषा | | | | | |
| झ. | ज्ञानात् | | | | | |
| ञ. | मुखे | | | | | |

**8. भिन्नप्रकृतिकं शब्दं चिनुत—**

क. अत्र, तत्र, सर्वत्र, मित्रम्।

ख. श्रोतुम्, गन्तुम्, धेनुम्, ज्ञातुम्।

ग. रामायणम्, पुराणम्, कालिदासः, महाभारतम्।

घ. अभिज्ञानशाकुन्तलम्, मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, मेघदूतम्।

ङ. छात्रः, सीता, गीता, शिक्षिका।

**9. अधोलिखितगद्यांशं पठित्वा उत्तराणि लिखत—**

अनूपपुरमण्डले अमरकण्टकं नाम पर्वतोऽस्ति। तत एव नर्मदा प्रादुर्भवति। तदनन्तरम् एषा गहनारण्येषु उत्तुङ्गपर्वतेषु च भ्रमणं कुर्वती डिण्डोरीमण्डलं प्रविशति।

क. अनूपपुरमण्डले किं नाम पर्वतः अस्ति?

ख. कुतः नर्मदा प्रादुर्भवति?

ग. डिण्डोरीमण्डलं का प्रविशति?

अथवा

तेन मेघदूतम् ऋतुसंहारञ्च द्वे खण्डकाव्ये विरचिते। मेघदूते पूर्वमेघः उत्तरमेघश्चेति द्वौ भागौ स्तः। अस्मिन् काव्ये मेघः यक्षस्य दूतः अभवत्। सः मेघः दूतरूपेण रामगिरितः हिमालयस्थानम् अलकापुरीं गच्छति। दूतमार्गस्य वर्णनं नैसर्गिकम् अतीव रमणीयं चास्ति।

क. कालिदासेन विरचितखण्डकाव्ययोः नाम लिखत।

ख. मेघदूतस्य भागयोः नाम लिखत।

ग. मेघः कस्य दूतः अभवत्?

घ. मेघः दूतरूपेण कुतः गच्छति?

**10. अधोलिखितं पद्यं पठित्वा उत्तराणि लिखत—**

कं सञ्जघान कृष्णः का शीतलवाहिनी गङ्गा।
के दारपोषणरताः कं बलवन्तं न बाधते शीतम्॥

क. कृष्णः कं जघान?

ख. शीतलवाहिनी का?

ग. दारपोषणरताः के?

घ. शीतं कं न बाधते?

अथवा

कस्तूरी जायते कस्मात् को हन्ति करिणां कुलम्।
किं कुर्यात् कातरो युद्धे मृगात् सिंहः पलायनम्॥

क. कस्तूरी कस्मात् जायते?

ख. करिणां कुलं कः हन्ति?

ग. कातरः युद्धे किं कुर्यात्?

घ. मृगात् शब्दे का विभक्तिः?

**11. उचितविकल्पं चित्वा लिखत—**

क. सर्वः पश्यतु। (दूरदर्शनम्/भद्राणि/अभद्राणि)

ख. आज्ञा ह्यविचारणीया (सहचराणाम्/गुरूणाम्/अधमानाम्)

ग. वयं संस्कृतं। (पठति/पठन्ति/पठामः)

घ. कालिदासमहोत्सवस्य आयोजनं भवति।
(कार्तिकपूर्णिमायाम्/देवप्रबोधिन्याम्/कार्तिककृष्णपक्षस्य एकादश्याम्)